**<u>धातुपाठे हल्–सन्धि–अभ्यासः</u>**

सन्धि–कार्यस्य अभ्यासार्थं यङ्लुगन्तधातवः सर्वोत्तमाः यतोहि प्रक्रियायां विकरणप्रत्ययो नास्ति | धात्वन्ते सर्वे हल्–वर्णाः लभ्यन्ते; एषां च वर्णानां तिङ्–प्रत्ययेन साक्षात् सम्पर्कः भवति | अधुना वास्तविकम् अभ्यासं कुर्मः; पश्येम कीदृशानि रूपाणि लभ्यन्ते लटि, लोटि, लङि, विधिलिङि च | अस्य कृते अस्माकं कार्ये त्रीणि सोपानानि सन्ति | क्रमेण एषां त्रयाणां चिन्तनम् अवश्यं करणीयम्—

<u>सोपानानि</u>
१) अतिदेशः
कित्/ङित् इत्यनयोः मार्गद्वयम् – अनुबन्धः, अतिदेशः | अतः परीक्षणं द्विवारं करणीयम् |
२) अङ्गकार्यम्
३) सन्धिः

<u>कित्/ङित् अङ्गकार्यम्</u>—
१) अङ्गान्ते उपधायां च इकः गुणः निषिद्धः | **सार्वधातुकमपित्** (१.२.४), **क्क्ङिति च** (१.१.५) |
२) अनिदित्–धातूनाम् उपधायां न्–लोपः | येषां हलन्तधातूनाम् इत्–संज्ञकः ह्रस्वः इकारः नास्ति, तेषां धातूनाम् उपधायां नकारः अस्ति चेत्, तस्य लोपो भवति | **अनिदितां हल उपधाया क्ङिति** (६.४.२४) |
३) सम्प्रसारणिनां धातूनाम् सम्प्रसारणम् | यण्–स्थाने इक्–आदेशः (यण्–सन्धौ यथा भवति, तस्य विपरीतक्रमः), किति ङिति प्रत्यये परे | व्रश्च् + श + ति → वृश्चति | **ग्रहि ज्या वयि व्यधि वष्टि विचति वृश्चति पृच्छति भृज्जतीनां ङिति च** (६.१.१६) |

**इग्यणः सम्प्रसारणम्** (१.१.४५) = यणः स्थाने यः इक्–प्रत्याहारे स्थितवर्णः आदिष्टः, तस्य सम्प्रसारण–संज्ञा भवति |
**सम्प्रसारणाच्च** (६.१.१०८) = सम्प्रसारण–संज्ञक–वर्णात् परे अच् अस्ति चेत्, पूर्वपरयोः स्थाने एकः पूर्वरूपादेशो भवति |
**न सम्प्रसारणे सम्प्रसारणम्** (६.१.३७) = सम्प्रसारणे परे पूर्वं स्थितस्य सम्प्रसारणं न भवति |

४) दीर्घ ॠकारान्तधातुः, प्रत्ययः अजादिः चेत् → इर्, उर् | **ॠत इद् धातोः** (७.१.१००) | प्रत्ययः हलादिः चेत्, ईर्, ऊर् | **हलि च** (८.२.७७) |

**ॠत इद् धातोः** (७.१.१००) = ॠदन्तस्य धातोः अङ्गस्य ह्रस्व–इकारादेशो भवति (किति ङिति प्रत्यये परे) |
**उरण् रपरः** (१.१.५१) = ऋकारस्य स्थाने यदा अण्–आदेशः भवति, तदा सः अण् सदा रपरः भवति |
**हलि च** (८.२.७७) = हलि परे रेफान्तानां वकारान्तानां च धातूनाम् उपधा–स्थितस्य इकः दीर्घत्वम् |
**उदोष्ठ्यपूर्वस्य** (७.१.१०२) = ओष्ठ्यपूर्वस्य ॠकारान्ताङ्गस्य ॠकारस्य ह्रस्वः उकारादेशः भवति | पवर्गीयः वर्णः पूर्वः यस्य, सः ओष्ठ्यपूर्वः |

**<u>यङ्लुगन्तधातूनां कृते सिद्ध–तिङ्प्रत्ययाः</u>**

अधः ये प्रत्ययाः स्थूलाक्षरैः लिखिताः, ते पितः इति धेयम् | यङ्लुगन्तधातूनाम् आत्मनेपदं न भवति |

<u>लट्–लकारः</u>

| | | |
|---|---|---|
| **ति/ईति** | तः | अति |
| **सि/ईषि** | थः | थ |
| **मि/ईमि** | वः | मः |

<u>लोट्–लकारः</u>

| | | |
|---|---|---|
| **तु/ईतु**/तात् | ताम् | अतु |
| हि/तात् | तम् | त |
| **आनि** | **आव** | **आम** |

<u>लङ्–लकारः</u>

| | | |
|---|---|---|
| **त्/ईत्** | ताम् | उः |
| **स्(◌ः)/ईः** | तम् | त |
| **अम्** | व | म |

<u>विधिलिङ्–लकारः</u>

| | | |
|---|---|---|
| यात् | याताम् | युः |
| याः | यातम् | यात |
| याम् | याव | याम |

<u>धातवः</u>

लुञ्च् → लोलुञ्च्
ग्रह् → जाग्रह्
प्रच्छ् → पाप्रच्छ्
भ्रस्ज पाके → भ्रस्ज् → बाभ्रस्ज्
(षस्ज् गतौ → सासस्ज्, ओलस्जी व्रीडायाम् → लस्ज् → लालस्ज्, टुमस्जो शुद्धौ → मस्ज् → मामस्ज्)
ज्या → जाज्या
व्यधि → वाव्यध्
वश् → वावश्
व्यच् → वाव्यच्
व्रश्च् → वाव्रश्च्

Swarup — July 2015